Roll No……………………….
Signature of Invigilator ………

Paper Code

BV-403

# पतंजलि विश्वविद्यालय

## University of Patanjali

## Examination May-June-2023

### बी.ए. व्याकरणम्, चतुर्थसत्रम्

### संस्कृतसाहित्यम्

होरात्रयम् पूर्णाङ्काः 70

निर्देश : अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## ( खण्ड-क )

पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः। ( 3 x15 =45 )

1. अभिज्ञानशाकुन्तलमाधारीकृत्य कालिदासस्य काव्यप्रतिभायाः मूल्यांकनं करणीयम्।
2. ‘सप्तकुमारिकावदानम्’ इत्यस्य सारः लेखनीयः।
3. काव्यदीपिकाग्रन्थमाधारीकृत्य अर्थदोषाः विवेचनीयाः।
4. शकुन्तलायाः चरित्रचित्रणं करणीयम्।
5. निम्नलिखितपद्यस्य व्याख्या कार्या -
   चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः
   सः प्रसादः समस्तेषु रसेषु रचनासु च।
   शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः।।

## ( खण्ड-ख )

पृष्टेषु अष्टासु पञ्च प्रश्नाः समाधेयाः। ( 5 x5 =25 )

6. ‘अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु’ इत्यस्य व्याख्या कार्या।
7. ‘यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः’ इत्यस्य व्याख्या करणीया।
8. ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
   उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।। - इत्यस्य कः अभिप्रायः?
9. ‘अकालगर्भा इव कन्यकानामजातसारावयवाङ्गशोभाः’ इत्यस्य किं तात्पर्यम?
10. व्याख्या करणीया - बालाः सुखोचिता यूयमकृतार्थमनोरथाः।
    कथं शक्नोम्यहं वक्तुमाश्रयध्वं तपोवनम्।।
11. ‘जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा’ - इत्यस्य अभिप्रायः कः?
12. ‘उपमा कालिदासस्य’ - इत्यस्य तात्पर्यं किम्?
13. ‘करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्’ इत्यस्य अर्थः कः?

--------------x--------------